Reg. No. : ......................................

Name : ..........................................

**SAY-710**

**SAY / IMPROVEMENT EXAMINATION, JULY – 2022**

Part – II

**SANSKRIT**

Time : 2½ Hours

Cool-off time : 15 Minutes

Maximum : 80 Scores

***निर्देशा :***

- 15 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

***നിർദ്ദേശങ്ങൾ:***

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കാനതിനും ഇഷ്ടമുള്ളവ തിരഞ്ഞെടുക്കാനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

## PART – I A (1 – 6)

**अस्मात् विभागात् चतुर्णां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकम् एकोऽङ्कः ।** **(4 × 1 = 4)**

**ഈ വിഭാഗത്തിൽ നിന്നും 4 ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. ഓരോ സ്കോർ വീതം.**

पेटिकातः उचितानि उत्तराणि चित्वा लिखत ।

| |
|---|
| आदिशङ्कराचार्यः, पी.सी.देवस्या, यशोधरा कूटियाट्टम्, शारिका, वृद्धसदनम् |

1. तूष्णीं भूत्वा तत्रैव उपाविशत् । का ?

2. विश्वचलच्चित्रेतिहासे प्रथमं संस्कृतचलच्चित्रं भवति ______ ।

3. सालारम् नाम किम् ?

4. क्रिस्तुभागवतस्य कर्ता कः ?

5. केरलीयसंस्कृत रूपकाभिनयः कः ?

6. श्रीबुद्धस्य पत्नी का ?

## PART – I B (7 – 10)

**अस्मात् विभागात् सर्वेषां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकम् एकोऽङ्कः ।** **(4 × 1 = 4)**

**ഈ വിഭാഗത്തിൽ നിന്നും എല്ലാ ചോദ്യങ്ങൾക്കും ഉത്തരം എഴുതുക. ഓരോ സ്കോർ വീതം.**

7. महाभारतस्य कर्ता कः ?

   (वाल्मीकिः, व्यासः, कालिदासः)

8. चित्तवृत्तिनिरोधः _________ ।

   (योगः, सांख्यम्, वेदान्तः)

9. सूर्याय सङ्कल्पितम् अलोकसामान्यं मन्दिरं कुत्र वर्तते ?

   (रामेश्वरे, कोणार्कदेशे, मधुरायाम्)

10. भारतीयभाषाविज्ञानस्य आधारभूतः ग्रन्थः भवति _______ ।

    (पाणिनीयव्याकरणम्, भारतम्, कठोपनिषद्)

## PART – II A (11 – 15)

**अस्मात् विभागात् त्रयाणां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं द्वौ अङ्कौ ।** **(3 × 2 = 6)**

**ഈ വിഭാഗത്തിൽ നിന്നും 3 ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 2 സ്കോർ വീതം.**

11. उदाहरणानुसारं वाक्यद्वयं योजयत ।

उदाहरणम् – विद्यालयं गच्छति । पाठं पठति ।

विद्यालयं गत्वा पाठं पठति ।

मन्दिरं गच्छति । प्रार्थनां करोति ।

_____________________ ।

12. उदाहरणानुसारं पदच्छेदं लिखत ।

**उदाहरणम्** – ममैव – मम + एव ।

1. सहैव - _____ + _____ ।

**उदाहरणम्** – सम्भवत्येव – सम्भवति + एव ।

2. जानात्येव - _____ + _____ ।

13. उचितेन पदेन पूरयत ।

(1) मठस्य समीपे एकं ______ अवर्तत ।

(कदलीवनम्, दण्डकवनम्)

(2) गुरोरन्तर्गतं विज्ञाय महाकविः ______ तत्

कार्यं न्यायाधिपाय न्यवेदयत् ।

(बल्लत्तोल्, कुमारनाशान्)

14. श्लोकांशान् योजयित्वा श्लोकं पूर्णरूपेण लिखत ।

| | | |
|---|---|---|
| 1. | दिशि दिशि किरति – सजलकणजालं । | विरहविहितमरणेव निकामम् ।। |
| 2. | हरिरिति हरिरिति जपति – सकामम् । | नयननलिनमिव विगलितनालम् ।। |

15. अधः प्रदत्तात् गद्यभागात् क्त्वान्त – तुमुन्नन्त – अव्ययानि चित्वा लिखत ।

जनपदं दृष्ट्वा प्रत्यागतः सिद्धार्थः अतीवदुःखितः आसीत् । केवलं जीवितुं जनाः कियान् क्लेशान् अनुभवन्ति इति सः अचिन्तयत् ।

क्त्वान्तं – ________ ।

तुमुन्नन्तं – ________ ।

## PART – II B (16 – 18)

**अस्मात् विभागात् द्वयोः प्रश्नयोः उत्तराणि लिखत । प्रत्येकं द्वौ अङ्कौ ।** **(2 × 2 = 4)**

**2 ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 2 സ്കോർ വീതം.**

16 उदाहरणानुसारं सन्धत्त ।

**उदाहरणम् –** अनयोः + च = अनयोश्च ।

1. भाषयोः + च = _________ ।

**उदाहरणम् –** समर्पितम् + अस्ति = समर्पितमस्ति ।

2. कल्पितम् + अस्ति = _________ ।

17. उदाहरणानुसारं पेटिकां पूरयत ।

| | |
|---|---|
| **उदाहरणम् –** 'अयोग्या वयमस्य ग्रहणे विशेषतस्त्वया गृहीतस्य शस्त्रस्य' वाक्यमिदं कः कं प्रति अवदत् । | कः – राक्षसः ।<br>कं प्रति – चाणक्यं प्रति । |
| 'योग्योऽहं त्वमयोग्य इति किमनेन ?' वाक्यमिदं कः कं प्रति अवदत् । | कः – ________ ।<br>कं प्रति – ________ । |

18. उदाहरणानुसारं वाक्यं परिवृत्य लिखत ।

उदाहरणम् – हरिकृष्णः गीतं गायति ।

हरिकृष्णः गीतम् अगायत् ।

1. देविका पाठं पठति ।

   देविका पाठम् _______ ।

2. राहुल् आतुरालयं गच्छति ।

   राहुल् आतुरालयम् _______ ।

## PART – III A (19 – 23)

**अस्मात् विभागात् त्रयाणां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं चत्वारि अङ्काः ।** **(3 × 4 = 12)**

**ഈ വിഭാഗത്തിൽ നിന്നും 3 ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 4 സ്കോർ വിതം.**

19. श्लोकं पठित्वा प्रस्तुतानाम् अप्रस्तुतानि लिखत

आवासो विपिनायते प्रियसखीमालापि जालायते ।

तापोऽपि श्वसितेन दावदहनज्वालाकलापायते ।

सापि त्वद्विरहेण हन्त ! हरिणीरूपायते हा कथं

कन्दर्पोऽपि यमायते विरचयञ्छार्दूलविक्रीडितम् ।।

| **प्रस्तुतानि** | **अप्रस्तुतानि** |
|---|---|
| आवासः | __________ |
| प्रियसखीमाला | __________ |
| सा राधिका | __________ |
| कन्दर्पः | __________ |

20 श्लोकस्य गद्यक्रमं पूरयत ।

**श्लोकः –** दृष्ट्वा चिन्तारतं क्षिप्रग्राहिणं बालकं मुनिः ।

प्रियामाचष्ट तद्वृत्तं सा तु मौनमधारयत् ।।

**गद्यक्रमः** चिन्तारतं क्षिप्रग्राहिणं _______ दृष्ट्वा मुनिः _______ प्रियां ______ स तु _______ अधारयत् ।

21. सम्भाषणं पूरयत ।

राजीवः – नमस्ते । सुखं वा ।

रमेशः – नमस्ते । ______ ।

राजीवः – विशेषः अस्ति वा ?

रमेशः – आम् । _______ अस्मिन् कलालये कलोत्सवं प्रचलति ।

राजीवः – भवान् मत्सयर्थीवा ।

रमेशः – आम् अहमपि ________ ।

राजीवः – सम्यक् अस्ति ।

रमेशः – _______ ।

राजीवः – धन्यवादः ।

22. गीतं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

सरसमसृणमपि मलयजपङ्कम् ।

पश्यति विषमिव वपुषि सशङ्कम् ।।

**प्रश्नाः** – 1. 'शरीरे' इत्यर्थे प्रयुक्तं पदं किम् ?

2. मलयजपङ्कं कीदृशमइव पश्यति ?

3. अस्य गीतस्य आशयं स्ववाक्यैः लिखत ।

23. श्लोकम् आशयं च यथोचितं योजयत ।

| **श्लोकः** | **आशयः** |
|---|---|
| 1. आत्मना बलवानेष ज्ञानपूर्णश्च बालाकः ।<br>अवर्धत समं पित्रोश्द्भुतानन्द शान्तिभिः ।। | अजसमूहं निरीक्ष्य भविष्यकालं चिन्तितवान् । |
| 2. मेषपालैर्नीयमानं मेषयूथं निरीक्ष्य सः ।<br>कुमारश्चिन्तयामास भाविशिष्य गणम् निजम् । | यहूदबालकैः साकं क्रीडातत्परः क्वापि चिन्तामग्नः च भूत्वा बालयम् अनयत् । |
| | विद्यासम्पन्नः शक्तियुक्तः चथेशुदेवः पित्रोः आनन्दं अवर्धयत् । |

## PART – III B (24 – 25)

**अस्मात् विभागात् एकस्य उत्तरं लिखत । चत्वारि अङ्काः ।** **(1 × 4 = 4)**

**ഈ വിഭാഗത്തിൽ നിന്നും 1 ചോദ്യത്തിന് ഉത്തരം എഴുതുക. 4 സ്കോർ.**

24. रेखाङ्कितपदानां स्थाने समानार्थक पदानि कोष्ठकात् उपयुज्य गद्यांशं पुनर्लिखत ।

पुरीतः कोणार्कं प्रति पन्थाः एका ऋजुरेखा भवति । पन्थानं प्रविष्टे जगन्नाथस्य रथोत्सवश्रुतयः शनैः मन्दीभूता इव अनुभवेयुः । अस्यां धन्यस्थल्यां विराजमाने सूर्याय सङ्कल्पिते अलोकसामान्ये मन्दिरे आराधना न भवति ।

(मन्दम्, पुण्यस्थल्यां, देवालये, मार्गः)

25. संस्कृतभाषया अनुवदत ।

1. യോഗശാസ്ത്രത്തിന്റെ കർത്താവ് പതഞ്ജലി ആണ്.

   Yogasasthra is written by Patanjali.

2. ആരോഗ്യത്തിന് വ്യായാമം അനിവാര്യമാണ്.

   Exercise is inevitable for health.

## PART – IV A (26 – 29)

**अस्मात् विभागात् त्रयाणाम् प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं षट् अङ्काः ।** **(3 × 6 = 18)**

**ഈ വിഭാഗത്തിൽ നിന്നും 3 ചോദ്യത്തിന് ഉത്തരം എഴുതുക. 6 സ്കോർ വീതം.**

26. इष्टतमगीतं चित्वा आस्वादनटीकां लिखत ।

1. श्वसितपवनमनुपमपरिणाहं

   मदनदहनमिव वहति सदाहम् ।

2. नयनविषयमपि किसलयतल्पं

   कलयति विहितहुताशनकल्पम् ।

3. दिशि दिशि किरति सजलकणजालं

   नयननलिनमिव विगलितनालम् ।

**सूचना** : आमुखम्, आशयः, आस्वादनम् ।

27. कथास्तम्भं क्रमीकुरुत ।

- पितरौ भोजनमन्विष्य गतौ ।
- वृक्षस्य आर्द्रता मातुः स्पर्शमिव आश्वासदायिन्यभवत् ।
- व्याधस्य शरेण वृक्षः विद्धः ।
- शरिका तूष्णीं भूत्वा तत्रैव उपाविशत् ।
- वृक्षः पत्रैः शाखाभिः च यथापूर्वं परिणतिं प्राप्तवान् ।
- शारिका पुरतः तापसीम् अपश्यत् ।

28. मलयालभाषया आङ्गलभाषया वा अनुवदत ।

अद्याहं लोकमपश्यम् । वार्धक्यं मरणं चापश्यम् । रोगं वेदनां चापश्यम् । वार्धक्यं रोगमरणं च साधारणमेव हि । सर्वैरपि दृष्टं च तत् । नास्ति कोऽपि मृत्युमुक्तः ।

29. गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

अनन्तपूर्याः अदूरवर्तिनः अरुविप्पुरजनपदस्य प्रान्ते सन्यासिवर्येण नारायणगुरुणा स्थापितः एकः मठः आसीत् । तस्य मठस्य समीपे एकं कदलीवनमवर्तत । एकदा क्षुदार्त्तः कश्चित् कदलीफलगुञ्जं मुषित्वा अगच्छत् । अन्तेवासिभिः परिश्रमेण गृहीतोऽयं चोरः आरक्षिजनसमक्षं नीतः । सः एकाधिकं शतं ताडनं तस्य दण्डरूपेण अघोषयत् । इमां वार्त्तां निशम्य नारायणगुरुदेवः अतीव दुःखितः आसीत् । क्षुत्पीडितम् फनं मन्दिराङ्कणे बद्ध्वा ताडनैः दण्डयति चेत् अयं वायुः श्वसनयोग्यो न भवेत् इति विचिन्त्य सः आश्रमात् अगच्छत् । गुरोः अन्यादृशं भावविशेषं विज्ञाय महाकविः कुमारनाशान् महोदयः गुरोरन्तर्गतं न्यायाधिपाय न्यवेदयत् ।

**प्रश्नाः –**

1. नारायणगुरुणा स्थापितः मठः कुत्र आसीत् ?
2. कदलीफलगुञ्जं मुषित्वा अगच्छत् । कः ?
3. दण्डरूपेण किम् अघोषयत् ?
4. "गृहीतोऽयम्" – पदच्छेदं लिखत ।
5. अत्र सूचितः महाकविः कः ?
6. उचितं शीर्षकं लिखत ।

## PART – IV B (30 – 32)

**अस्मात् विभागात् द्वयोः प्रश्नयोः उत्तराणि लिखत । प्रत्येकं षट् अङ्काः ।** **(2 × 6 = 12)**

**ഈ വിഭാഗത്തിൽ നിന്നും 2 ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 6 സ്കോർ വീതം.**

30. गद्यभागं संगृह्य लिखत ।

भारतीयानां साहित्यसर्वभूतम् इतिहासकाव्यं भवति महाभारतम् । अस्य प्रणेता कृष्णद्वैपायन व्यासः भवति । महाभारतस्य पञ्चमो वेदः इति ख्यातिः अस्ति । सपादैकलक्षश्लोकात्मकोऽयं ग्रन्थः । बृहदाकाशेऽयं ग्रन्थः अष्टादशपर्वभिः विभक्तः । कुरुणां पाण्डवानां च चरितं मुख्यतया अत्र प्रतिपादितं विद्यते ।

भारतीयदर्शनेषु प्रमुखं स्थानं वहन् श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वणि अन्तर्भवति । अयं ग्रन्थः वेदान्तदर्शने विद्यमानेषु प्रस्तानत्रयेषु अन्यतमः भवति । मानवजीवनस्य विविधविषयाः अत्र समीचीनतया प्रतिपादिताः सन्ति ।

कुरुक्षेत्रयुद्धमुखे अर्जुनेन सुहृद्बान्धवाः अभिमुखीकृताः । सन्दर्भेऽस्मिन् युद्धनिपुणोऽपि सः दुर्बलचित्तः युद्धविमुखश्च अभवत् । तदाकृष्णः कर्मविमुखम् अर्जुनं कर्मोन्मुखताम् अनयत् । भगवद्गीता अधुनापि मानवानां मार्गप्रदर्शका भवति । अस्य प्रमुखः सन्देशः भवति "यतो धर्मस्ततो जयः" ।

31. यथोचितं योजयत ।

| क | ख |
|---|---|
| महाभारतम् | माटम्प् कुञ्ञुकुट्टन् |
| मुद्राराक्षसम् | पाणिनिः |
| योगशास्त्रम् | व्यासः |
| व्याकरणशास्त्रम् | विशाखदत्तः |
| महाप्रस्थानम् | जयदेवः |
| गीतगोविन्दम् | पतञ्जलिः |

32. आङ्गलपदानां स्थाने संस्कृतपदानि कोष्ठकात् उपयुज्य यात्राविवरणं पुनर्लिखत ।

गिरिधरः In the morning पठनयात्रार्थं School गतवान् । After विद्यालयतः with the Students तिरुवनन्तपुरं प्रति अगच्छत् । मार्गमध्ये ते Beautiful दृश्यानि आस्वादयन्ति स्म । अनन्तरं Ten वादने अनन्तपुरीं प्राप्तवन्तः ।

(विद्यालयं, दश, प्रभाते, मनोहराणि, अनन्तरं, छात्रसङ्घेन)

**PART – V (33 – 35)**

**अस्मात् विभागात् द्वयोः प्रश्नयोः उत्तराणि लिखत । प्रत्येकम् अष्ट अङ्काः ।** **(2 × 8 = 16)**

**ഈ വിഭാഗത്തിൽ നിന്നും 2 ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 8 സ്കോർ വീതം.**

33. खण्डिकां पठित्वा श्रीनारायणगुरुदेवस्य जीवनचरितं लिखत ।

श्रीनारायणगुरुदेवः१८५४ तमे वर्षे केरले तिरुवनन्तपुरस्य समीपे चेम्पषन्ती ग्रामे जनिमलभत । शतभिषक् नक्षत्रे भूजातस्य तस्य पितरौ माटनाशान् तथा कूट्टियम्मा च । नाणु आशान् इति नाम्ना प्रसिद्धो नारायणगहा भागः सामाजिक – सांस्कृतिक आध्यात्मिक मेखलासु च अनितरसाधारण प्रतिभा प्रकटितवान् । तेन महाभागेन आत्मोपदेश शतकम्, दर्शनमाला, दैवदशकम् इत्यादीनि विविधानि स्तोत्रकाव्यानि रचितानि । अयं अष्टाविंशत्युत्तरनवदशतमे वर्षे सितम्बर मासे स्वेन स्थापिते शिवगिरिमठे समाधिं प्राप ।

| **जीवनचरितम्** | |
|---|---|
| नाम | : |
| अपरनाम | : |
| जननं | : |
| देशः | : |
| पितरौ | : |
| प्रवर्तनमेखला | : |
| रचनाः | : |
| समाधिः | : |

34. प्रदत्तं गद्यभागं पठित्वा पटकथामेकां लिखत ।

सप्तर्षीणाम् अन्यतमः महान् योगी वसिष्ठस्तमपृच्छत् "अये वत्स कस्त्वम् ? केवलं कमण्डलुर्वल्कलश्च अस्माकं धनम् । तेन तव किं प्रयोजनम् ?" । "कमण्डलुश्चेत् कमण्डलुः, दातव्यं तत्" निषादः सक्रोधमवदत् । तथापि मुनेः "वत्स" इति संबोधनेन तस्य हृदयमभूतपूर्वां कामण्यनुभूतिम् अलभत ।

35. सूचनानुसारं भारतीयकलासु कूटियाट्टस्य प्राधान्यमधिकृत्य उपन्यासं लिखत ।

**सूचना :**

- युनस्को इति अन्ताराष्ट्रसभायाः अङ्गीकारः ।
- मिलित्वा अभिनयः
- केरलीय संस्कृतरूपकाभिनयः
- वैशिष्ट्यम् ।

---